Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 3 | ISSN : 2581- 6306

# भोजदेवस्य शृङ्गारप्रकाशे उपस्कारस्य वैलक्षण्यम्

**डॉ0 सर्वेश कुमार शाण्डिल्यः**

असिस्टेण्ट प्रोफेसरः, संस्कृतविभागः, दयानन्द वैदिक कॉलेज उरई, जालौन, उत्तरप्रदेशः।

**Article Info**

Volume 5, Issue 3

Page Number : 88-100

**Publication Issue :**

May-June-2022

**Article History**

Accepted : 01 May 2022

Published : 30 May 2022

**सारांशः–** साहित्यशास्त्रस्य ''शब्दार्थौ सहितौ काव्यम्'' इति आचार्यभामहस्य काव्यलक्षणमधिकृत्य अपरिभाषितान् द्वादश शब्दस्य, द्वादश अर्थस्य च पारिभाषिकशब्दभेदान् तेषां प्रक्रियात्मकं रहस्यञ्च विशिष्टेन विवेचनादिकौशलेन उपस्थापयितुं संघटते भोजराजः। एतेषु द्वादशसु विभागेषु सेमेषामेव स्वोपज्ञरूपेण प्रज्ञासन्धानेन परिभाषासु निबध्नाति उदाहरणैश्च पुपोषति भोजः। आदौ प्रकृतिप्रत्ययादीनां विवेचनात्परम् अपरिभाषितभेदं उपस्कारशब्दं प्रकाशयति भोजदेवः। अत्र विवेचनप्रक्रियायाः माहात्म्येन द्रुतमेव हृदयं परिस्पन्दते, भूयांसि अप्राप्तानि तत्त्वानि तथ्यानि च साक्षात्कृतानि शृङ्गारप्रकाशे।

**संकेतशब्दाः–** प्रकृतिः, प्रत्ययः, 12 शब्दभेदाः, उपस्कारः, गुणाधानम्, उपसर्गः, उपग्रहः, आगमः, लोपः, वर्णविकारः, विकरणं, संस्कारः इत्यादयः।

विविधकलानामधिष्ठानं विचित्रमिदम् अखिलं जगत्। इह जगतीतले नानाकलावन्तो नानापथजुषः आश्रयभाजः मानवाः प्रातिनिध्यं कुर्वन्ति कलानाम्। ये कलानां वैचित्र्येण सर्वान् आकर्षयन्ति, सर्वोत्कृष्टञ्च प्रतिपादयन्ति। कलानामनेकत्वम् आस्माकीने संस्कृतवाङ्मये लब्धशास्त्रीयप्रमाणैः सिद्धम्। तासु नानाविधकलासु विलक्षणा काव्यकला सर्वानस्मान् अनुरञ्जयति, सम्प्रमोदयति, अभिप्रेरयति, अस्माभिः सर्वातिशयञ्च कारयति। काव्ये येन अनुशिष्यते, उचितानुचितं निर्णीयते, परिमितिः परिधिश्च निश्चीयते तच्छास्त्रं काव्यशास्त्रम्। इयं काव्यशास्त्रीयानवच्छिन्नाधोरणिः अग्निपुराणकारादारभ्य समायातान् मध्यवर्तिनः उत्कर्षापकर्षकालिकान् प्रत्यवायानपसार्य विहाय च आधुनिककालं यावत् स्वीयेन अमन्दानन्दसन्दोहेन अक्षुण्णरूपेण अतितमाम् अस्मान् चमत्करोति उपकरोति च। काव्यशास्त्रपरम्परायां यथाकालं स्वीयैः ग्रन्थरत्नैः समुपकुर्वन्तो नैके आचार्याः प्रतिष्ठां लभाञ्चक्रिरे। तेषु काव्यशास्त्रीयसिद्धान्तोपस्थापनेन साकं साहित्यमधिगन्तुं कवित्वसाधनायोत्कर्षाय च आचार्याश्च केचन काव्यसंसारे स्वकीयं व्याकरणशास्त्रज्ञानपाटवं नैपुण्यञ्च उद्घाटयामासुः। येन ते

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

वर्णन–विवेचनादिकौशलेन काव्यशास्त्रसरण्यां विशिष्टं स्थानं दधते। तेषु प्रमुखः धारानगर्याः अधिराजः क्षितिरक्षकः, विद्यापरायणः, विपुलानां शास्त्राणां गोचरीकृतः आचार्यो भोजराजः। भोजस्य विलसितेषु बहुषु ग्रन्थेषु अतिविश्रुतौ द्वौ ग्रन्थौ सरस्वतीकण्ठाभरणं, शृङ्गारप्रकाशश्चेति। भोजस्य विद्याविलासस्य परिपाकः, सुविशालो महत्तमो ग्रन्थः शृङ्गारप्रकाशः अनधिकसमयात्पूर्वमेव समादरणीयेन सनातनकविना महामहोपाध्यायरेवाप्रसादद्विवेदिना अथ च अस्मत्पूज्यगुरुणा प्रो0 सदाशिवकुमारो द्विवेदिना च कृतेन अपूर्वप्रयासेन सम्पादनेन प्राकाश्यमागतः। शृङ्गारप्रकाशे षट्त्रिंशत् प्रकाशास्सन्ति। अद्भुतेऽस्मिन् ग्रन्थे आदिषु षट्प्रकाशेषु कवित्वबुद्धिविज्ञानस्य सुसमृद्धये व्याकरणस्य साहित्यशास्त्रस्य च **''शब्दार्थौ सहितौ काव्यम्''**[1] इति आचार्यभामहस्य काव्यलक्षणमधिकृत्य अपरिभाषितान् द्वादश शब्दस्य, द्वादश अर्थस्य च भेदान् तेषां प्रक्रियात्मकं रहस्यञ्च विशिष्टेन विवेचनादिकेन कौशलेन उपस्थापयितुं संघटते भोजराजः। तत्र साहित्यन्नाम **''सहितयोः शब्दार्थयोस्सम्बन्धः साहित्यम्** उच्यते। काव्यलक्षणे शब्दार्थयोः मञ्जुलो लालित्यपरिपूर्णस्सन्निवेशः साहित्यमामनन्ति प्रज्ञावन्तः। इदमेव प्रोच्यते वक्रोक्तिजीविते–

**साहित्यमनयोश्शोभा–शालितां प्रति काप्यसौ।**
**अन्यूनानतिरिक्तत्व–मनोहारिण्यवस्थितिः।।**[2]

एवम्प्रकारेण शब्दार्थयोर्विज्ञानं साहित्यमुपकर्तुं, समेधयितुं च कवित्वसाधयितुञ्च अत्यन्तम् अपरिहार्यम्। अत एव साहित्यदृशा सुसाध्यमेव प्रागिति विचिन्त्य ग्रन्थेऽस्मिन् सम्प्रवर्तते भोजराजः। विविधाः विषयाः समुद्घाटिताः अत एव भोजराजः स्वकीयं शृङ्गारप्रकाशम् अशेषविद्यास्थानमिति व्याचष्टे। यथा– **यस्मिन्नशेषविद्यास्नानार्थविभूतयः प्रकाशन्ते। संहत्य सः साहित्यप्रकाश एतादृशो भवति।। एतस्मिन् हि शृङ्गारप्रकाशे सुप्रकाशमेवाशेष–शास्त्रार्थसम्पदुपनिषदा–मखिलकलाकाव्यौचित्य –कल्पनारहस्यानाञ्च सन्निवेशो दृश्यते।**[3] धामचतुष्टयेषु महाकालधामवास्तव्यो भोजदेवः 'शृङ्गारस्य प्रकाशः शृङ्गारप्रकाशः इत्यत्र शृङ्गं चैतन्यमीरतीति शृङ्गार इति व्युत्पत्या समेषामिन्द्रियाणामाश्रयस्थानं चैतन्यमात्मतत्त्वं शृङ्गमिति अथ च तदात्मचैतन्याह्लादकारकतत्त्वान् शृङ्गार इति पदेनाख्यायते। अनेन सहृदयहृदय–चमत्कारैकसाधकं कमनीयसाहित्यमेव अस्तीति धिया तदाशयं पूर्णतामेति। अत एवायं अखिलशास्त्रवितानागारः साहित्यप्रकाशः संस्थापयामास।

सर्वप्रथमं भोजदेवः **'येनार्थ–प्रत्याय्यते स शब्दः। यः शब्देन प्रत्याय्यते सोऽर्थः।**[4] अर्थाद् यस्योच्चारिते कश्चिदर्थो बोध्यते स शब्दो भवति। एवं यः अर्थेन बोध्यते गृहयते वा स अर्थो भवति। शब्दस्य स्थितिरपि तादृशी एव, यतो हि वर्णानां समवायश्शब्दः, एवं वर्णस्फोटपरिकल्पनायां ''स्फुटति अभिव्यक्तीभवति अर्थो यस्माद् असाविति परिभाषामभिलक्ष्य श्रूयमाणध्वनिमेव शब्देन सञ्जानीते। भोजः अत्र एकैकमप्यर्थकारकं तत्त्वं शब्देति संज्ञया व्यवह्रियते। एतेषामाशयो सार्थकमेव यतोहि पाणिन्यनुशासिताश्शब्दास्सार्थकतामेव उपायान्ति।

साहित्यिकाभिव्यक्तीनामनेके प्रकाराः भवन्ति अतोऽत्र व्यवहाराश्रिताः शास्त्राश्रिताश्च शब्दस्यानेके भेदाः प्रभेदाश्च प्रकल्पिता आचार्येण। लौकिकः वैदिकश्च द्विरूपात्मकः शब्दः द्वादशसु भेदेषु निरूपयति भोजः। तद्यथा–

**प्रकृतिः, प्रत्ययः, उपस्कारः, उपपदम्, प्रातिपदिकं, विभक्तिः, उपसर्जनं, समासः, पदं, वाक्यं प्रकरणं, प्रबन्धः च।**[5]

एतेषु द्वादशसु विभागेषु सेमेषामेव स्वोपज्ञरूपेण प्रज्ञासन्धानेन परिभाषासु निबध्नाति उदाहरणैश्च पुपोषति भोजराजः। व्याकरणशास्त्रेषु विशेषतः सूत्रात्मके पाणिनिव्याकरणे इदमित्थमिति रीत्या एते शब्दाः न निरूपिताः शाखोपशाखाश्च न सन्ति। शब्दार्थयोः परिज्ञानाय एकत्रीकृतानि संसाधनानि तथ्यानि च, शब्दप्रमाणैः अनधिगतम् अपरिभाषितम् अर्थविषयकञ्च वैभवं ग्रन्थेऽस्मिन् स्पष्टतामवाप्नोति। इयमपि व्याकरणशास्त्रस्य व्याख्यानस्य काचन रीतिः। भोजव्याकरणस्य पणिनिव्याकरणम् आधारः, क्वचित् परम् अभिनवत्वं संदृश्यते। आदौ प्रकृतिप्रत्ययादीनां विवेचनात्परम् अपरिभाषितभेदं उपस्कारशब्दं प्रकाशयति भोजदेवः। अत्र विवेचनप्रक्रियायाः माहात्म्येन द्रुतमेव हृदयं परिस्पन्दते, भूयांसि अप्राप्तानि तत्त्वानि तथ्यानि च साक्षात्कृतानि।

उपस्काराब्दस्य विषये अष्टाध्याय्यां महर्षिपाणिनिना साक्षाद्रूपेण किमपि नोक्तं परम् अयं शब्दः 'लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यतीति' धिया भाष्यवार्तिके उपलभ्यते।[6] लोपागमविकारादिषु अर्थेषु उपस्कारशब्दः प्रयुज्यते। पाणिनिना केवलं ''तत्रोपपदम् सप्तमीस्थम्' इति सूत्रेण उपपदसंज्ञायाः विधानं क्रियते। सूत्रस्याशये 'धातोः' इति अधिकारान्तर्गते प्रत्ययान्तं कर्मणीत्यादि–तद्वाचकं पदम् उपपदसंज्ञकं भवति। यथा कुम्भं करोतीति कुम्भकारः इति शब्दे 'कुम्भ अम् कार इति स्थितौ अनेन सूत्रेण कुम्भपदस्य उपपदसंज्ञात्वेन 'उपपदमतिङ्' इति सूत्रेण समासेन कुम्भकारः इति रूपं सिद्ध्यति। अनेन कुम्भकारादिपदानां निष्पत्तिः उपपदसंज्ञायाः प्रतीयते प्रयोजनम्।

पाणिनिव्याकरणे पारिभाषिकशब्दानां पृथग् वर्गीकरणं स्वतन्त्ररूपेण न दृश्यते। पारिभाषिकशब्दाः द्व्यर्थकाः प्रतीयन्ते। विभिन्नप्रयोजनार्थमेव वैयाकरणैः एतादृशकृत्रिमनामानि दत्तानि। व्याकरणशास्त्रे एव तादृशप्रयोजनम्। कृत्रिमसंज्ञाना प्रयोजनं न केवलं व्याकरणे एव अपितु लौकिकव्यवहारे अपि संदृश्यते। यथा– 'वृद्धिरादैच्, 'अदेङ्गुणः इति वृद्धिगुणसंज्ञा विधायके सूत्रे। किन्तु लौकिके व्यवहारे वृद्धिगुणश्च स्वकीयार्थेष्वेव प्रयुज्येते। पुनः पारिभाषिकशब्दाः सैद्धान्तिकाः मौलिकाश्च द्विधा विभक्ताः। सैद्धान्तिकाः स्वतन्त्रार्थभिन्नाः, व्याकरणशास्त्रे निरुक्ताश्च प्रक्रियादशायामेव तेषां विशेषार्थोपलब्धिः। मौलिकशब्दाः व्याकरणशास्त्रे निरूपिताः अपि च तेषां लौकिकव्यवहारे अपि स्वकीयार्थाः भवन्ति।

एवम्प्रकारेण अव्याख्यायितस्य उपपदशब्दस्य स्वदृष्ट्या अभिनवेन कलेवरेण तितनिषति शृङ्गारप्रकाशे आचार्यभोजराजः। तथा चाह– **प्रकृतिप्रत्ययाना–मुपसर्गोपग्रहागम–लोपवर्णविकार–विकरणादिरूपः संस्कारः**

**उपस्कारः ।**[7] अत्र वी0 राघवन् महोदयेन उच्यते 'उपग्रहः=विग्रहः। प्रकृति–प्रत्ययानाम् इति प्रकृतिप्रत्ययोभयानाम्। विकारः अत्र वर्जं सर्वत्र विकारः नास्ति।[8]

पाणिनिव्याकरणशास्त्रे उपस्कारनाम्ना 'गुणाधानम् उपस्कारः इत्यन्वर्थो अपि लक्ष्यते। अत्र गुणाधानमेवोद्दिश्य नवरूपेण संस्कारस्य कारकाणां, साधकानाञ्च तत्त्वानामुपस्कारपदेन विस्तरेण अङ्गीचकार। कारकेषु नावीन्यं नास्ति परं तेषाम् उद्देश्ये ऐक्येन च प्रतिपाद्ये नूत्नता संदृश्यत एव, एवम् इतस्ततः शास्त्रे प्रक्षिप्ताः सर्वेऽपि संस्कारस्य कारकांशाः एकान्वये संगृहीताः। उपकारस्य भेदत्रयः प्रकटिताः ये तु नोपलभ्यन्ते क्वचिदपि एवम्प्रकारेण। ते च– **प्रकृत्युपस्कारः, प्रत्ययोपस्कारः, उभयोपस्कारश्च।** एतेषां त्रयाणामपि पौनःपुन्येन **भूषण–समवाय–अध्याहार–वैकृत–यत्न–प्रतियत्नभेदात् प्रत्येकस्य षट्प्रकाराः सन्ति।**[9]

**1. प्रकृत्युपस्कारः–** अस्मिन् विषये उच्यते ''**प्रकृतौ यदुपस्कारः तत् प्रकृत्युपस्कारो** भवति। अर्थात् प्रकृतिमभिलक्ष्य उपसर्जनं कार्यं वा क्रियते तत् प्रकृत्युपस्कारो भवति। 'एते प्रकृतेः भूषणरूपाः निरर्थकोपसर्ग–स्वार्थकवैकल्पिकादयः भवन्ति। अत्र स्वार्थे प्रयुक्तेन निरर्थकेन उपसर्गेण अर्थे परिवर्तनं न दृश्यते केवलं शब्दे भूषणाय सौन्दर्यवर्धनाय च प्रयोगो दरीदृश्यते। एवम्प्रकारेण एतैः उपसर्गैः निष्पन्नाः शब्दाः प्रकृत्युपस्काररूपेण स्वीक्रियन्ते। अथ च प्रकृतेः भूषणरूपाः उपस्काराः सन्ति यथा– अध्यागच्छति, पर्यागच्छति, प्रलम्बते, निखंजति इति, यावकः, षाड्गुण्यम्, औपयिकम्, मानसम् इति एवञ्च मृद्वी, कमण्डलू, चञ्चूः च इति[10]। एते भूषणरूपाः उपसर्गाः द्वाविंशति संख्याकाः भवन्ति। ते प्रकृतेः आदौ प्रयुज्यन्ते। तद्यथा– प्र, परा, अप, सम, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत, अभि, प्रति, परि, उप एते प्रादयः उपसर्गास्सन्ति[11]। एतैः प्रायेण अर्थेषु परिवर्तनं भवति। यथा उच्यते–

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहार–संहार–विहार–परिहारवत्।।**[12]

एतेषु उदाहरणेषु अधि, परि, प्र, नि एते निरर्थकोपसर्गाः सन्ति। प्रायः एते सार्थकाः निरर्थकाश्च दृश्यन्ते। उपसर्गाणामेतेषाम् उपर्युक्तैः शब्दैः सह किमपि प्रयोजनं सम्बन्धश्च नास्ति। अथ च यावकः इत्यस्मिन् यावशब्दात् 'स्वार्थे यावादिभ्यः कन्13 इति सूत्रेण कन् प्रत्ययो विधीयते। षाड्गुण्यम् इत्यत्र षड्गुण–शब्दात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च[14] इति सूत्रेण भावार्थे ष्यञ् प्रत्ययो भवति। औपयिकम् अत्र 'विनयादिभ्यष्ठक्[15] सूत्रेण ठक् प्रत्ययः। मानसम् अत्र च 'प्रज्ञादिभ्यश्च[16]इति सूत्रेण स्वार्थे अण् प्रत्ययः। वैकल्पिकेषु आली–आलिर्विंशदाशये इति। आलिशब्दः स्त्रियां वयस्यां सेतौ पङ्क्तौ च कीर्तिता[17] अस्ति। मृद्वी शब्दे 'वोतो गुणवचनात्[18] इति सूत्रेण विकल्पेन ङीष् प्रत्ययो भवति। कमण्डलूः अत्र अङ् प्रत्ययः छन्दसि विषये संज्ञायाञ्च भवति[19]। अनेन प्रकारेण स्वार्थे भूषणरूपाः एते उपस्काराः केचित् प्रकृतिमुपकुर्वन्ति।

**समवायरूपाः–** यत्र अन्योन्यभावेन प्रकृतिप्रत्यययोः संयोगो दृश्यते, सः द्वितीयस्समवायो नाम सम्बन्धः। समवायरूपे केचन सार्थकाः प्रत्ययाः यैः अर्थे परिवर्तनं संदृश्यते। ते सन्, क्यङ्, क्यच्, काम्यच् णिच् आदयश्च प्रत्ययाः भवन्ति। यथा शृङ्गारप्रकाशे– 'समवायरूपाः सार्थकोपसर्ग–सन्क्यङादयः वर्तन्ते। प्रयोगे यथा– आशास्ते, प्रतिष्ठते, सुमनायते, दुर्मनायते इति। जुगुप्सते, गोपायते, कामयते च। पुत्रीयति, पुत्रकाम्यति, श्येनायते, मुण्डयति चेति[20]। प्रक्रियायां आशास्ते इत्यत्र आङ् उपसर्गः प्रकृतौ प्रयुज्यते, आङुपसर्गात् आशु इच्छायाम् इत्यस्माद् धातोः इदं रूपं निर्मीयते। प्रतिष्ठते इति क्रियापदे सार्थकत्वेन उपस्कारः प्रकृष्टे अर्थे सार्थकोऽस्ति। सुमनायते, दुर्मनायते इत्यनयोः सु, दुर् उपसर्गौ सार्थकौ समवायरूपौ। जुगुप्सते प्रयोगे सन् प्रत्ययः 'गुप्तिज्कृद्भ्यः सन्[21] इति सूत्रेण क्रियते। कामयते इत्यत्रापि क्यच् णिङ् सनादिप्रत्ययानां विधानं दृश्यते। पुत्रीयति अत्र 'सुपः आत्मन् क्यच् सूत्रेण क्यच् प्रत्ययः। पुत्रकाम्यति अत्र च 'काम्यच्च[22] इति सूत्रेण काम्यच् प्रत्ययः। एवमेव श्येनायते, मुण्डयति अत्र च क्यङादिप्रत्ययैः निष्पन्नाः। एते उपसर्गाः प्रत्ययाश्च सार्थकाः समवायरूपाश्च वर्तन्ते। **काव्यप्रयोगो** यथा नैषधीयचरिते महाकाव्ये–

**इतीरिता पत्ररथेन तेन, ह्रीणा च हृष्टा च बभार भैमी।**

**चेतो नलङ्कामयते मदीयं, नान्यत्र कुत्रापि च साभिलाषम्।।**[23]

उपस्काररूपे 'कामयते' क्रियापदे 'कमु कान्तौ इति धातोः भोजदृशा सार्थकोपसर्गः एवं णिङ् प्रत्ययः 'कमेर्णिङ् इति सूत्रेण विधीयते।

**अध्याहाररूपाः–** अथ च अध्याहाररूपाः सहाभिधायकोपसर्गाः द्विर्वचनसुडागमादयः प्रतिपादिताः शृङ्गारप्रकाशे। यथा– अधीते, अध्येति, अनुरुध्यते, संग्रामयते च, जञ्जप्यते, संपनीपद्यते, उन्दिदिषति इति, उपस्कुरुते, अपप्तत्, आस्थत्**[24]** इति च एतानि अध्याहाररूपाणि तत्त्वानि सन्ति। यैः प्रकृतौ द्विर्वचनार्थस्य उपस्काररूपं परिवर्तनं संदृश्यते। 'अधीते अस्मिन् क्रियापदे अदादिगणपाठस्य इङ् अध्ययने धातोः प्रयोगः अधि उपसर्गपूर्वकमेव अस्ति।[25] एवमत्र अधि उपसर्गः सहाभिधायकोपसर्गरूपेण वर्तते। अध्येति इत्यत्र च अध्युपसर्गपूर्वकात् इक् स्मरणे धातुः सहाभिधायकेन रूपेण अस्ति। वर्तेते एवमेव अनुरुध्यते, संग्रामयते अत्रापि अनु, सम उपसर्गौ सहाभिधायकौ। अथ जञ्जप्यते अत्र जप्+यङ्+ते इत्यत्र सन्यङोः[26] सूत्रेण द्विर्वचनं द्वित्वं वा भवति एवं 'जपजभदहदशभञ्जपशां[27] इत्यनेन पाणिनीयेन नुमागमश्च भवति। संपनीपद्यते समोपसर्गपूर्वकात् पद+यङ्+ते अस्मिन्नपि 'सन्यङोः[28] सूत्रेण द्विर्वचनं नुमागमश्च अभवत्। एवञ्च अरार्यते, उन्दिदिषति अत्रापि द्विर्वचनविधिः प्रवर्तिता। अभ्याहारार्थे उपात् उपस्कुरुते अत्र च परं सुड् आगमो मध्ये प्रविशते[29]। एवमेते सहाभिधायकाः उपसर्गाः अध्याहाररूपाः, द्विर्वचनरूपाणि, सुडागमादयः दृश्यन्ते।

**वैकृतरूपाः—** अतः परं वैकृतरूपाः वर्णव्यत्यय—विपर्यय—अपायादयो भवन्ति। अत्र वर्णव्यत्यययादिरूपैः शब्दे विकृतिः परिवर्तनं वा दृश्यते। तद्यथा— निषिञ्चति, प्रणयति, यन्ति, उशन्ति इति, तरुः, सिकता, सक्तवः इति, सन्ति, घ्नन्ति, द्यन्ति[30] चैते शब्दास्सन्ति। अस्मिन् व्यत्ययो विपर्ययश्च व्यतिक्रमः तत्पर्यायः एवञ्च अपायो विश्लेषः। प्रथमे निषिञ्चति प्रयोगे सकारस्य स्थाने षकारो[31] वर्णव्यत्ययो अभवत्। प्रणयति अत्र नकारस्य णकारो[32] भवति अर्थात् नकारस्य स्थाने णकारः इति विकृतिर्भवति। एवञ्च 'यान्ति अस्मिन् इकारस्य लोपो तथा च तस्य स्थाने यकारो भवति इणो यण्[33] इति पाणिनीयेन सूत्रेण। उशन्ति अत्र वकारस्य सम्प्रसारणेन उकारादेशो भवति। हिनस्तीति सिंहः इत्यस्मिन् शब्दे 'पृषोदरादित्वाद् आद्यन्तविपर्ययो जातः[34]। सिकता इति प्रयोगे कस गतौ भ्वादिगणपाठस्य धातुना वर्णस्य विर्पययो अभवत्। सक्तवः अत्राापि कस गतौ इति धातोः वर्णविपर्ययो अभूत्।[35] यथा त्रिविक्रमभट्टस्य नलचम्पूग्रन्थस्य **काव्यप्रयोगे—**

**अप्रगल्भा पदन्यासे, जननी रागहेतवः। सन्त्येके बहुलालापाः कवयो बालका इव।[36]**

पद्ये 'सन्ति' इति क्रियापदं प्रकृत्युपस्कारस्य वैकृतरूपस्य वर्णस्य अपायस्य उदाहरणम् अस्ति। अत्र अस् धातोः अकारलोपो दृश्यते।

**यत्नरूपा—** अतः परं यत्नरूपा उपस्कारप्रकृतिः उपचय—प्रसव—संवृत्यादिषु अर्थेषु प्रयुज्यते। यथा— यौति, मेद्यति, दीव्यति, निगूहति च, कीर्यते, पूर्यते, सौधतकिः, स्वायम्भुवम् इति, आस्त, आस्ते, अवोचत्, घटयति[37] चेत्यादयः प्रयोगास्सन्ति। प्रयोगेषु उपचयो नाम वृद्धिः अर्थाद् उल्लासः। प्रसवः गर्भमोचनम् भवति। यौति अत्र यु तिप् इति स्थिते 'उतो वृद्धिर्लकि हलि[38] इत्यनेन सूत्रेण वृद्धिर्भवति। दीव्यति अत्र हलि च[39] इत्यस्मिन् सूत्रेण दीर्घो विधीयते। अथ मेद्यति निगूढति अत्रापि वर्णोपचयो अस्ति। अन्ते कीर्यते अत्र 'ऋत इद्धातोः[40] अनेन अकारादेशः हलि च[41] इत्यनेन च दीर्घो क्रियते। यथा भट्टनारायणस्य वेणीसंहारस्य **काव्यप्रयोगे—**

**प्रवृद्धं यद्वैरं मम खलु शिशोरेव कुरुभिः, न तत्राऽर्यो हेतुर्न भवति किरीटी न च वयम्।**
**जरासंधस्योरस्थलमिव विरूढ़ं पुनरपि, क्रुधा सन्धिं भीमो विघटयति यूयं घटयत।।[42]**

अत्र श्लोके 'विघटयति घटयत' च एतौ यत्नरूपस्य प्रकृत्युपस्कारस्य उदाहरणे वर्तेते। अस्मिन् णिच् प्रत्ययस्य इकारस्य स्थाने अयादिसन्धिः क्रियते।

**प्रतियत्नरूपाः—** प्रतियत्नरूपाः प्रकृत्युपस्कारो विशेषादेश—निषेधादयो निरूपिताः आचार्यभोजेन। अर्थाद्यत्र विशेषादेश—विधिनिषेधादीनां प्रवृत्तिर्दृश्यते। उदाहरणेषु यथा— आह, अघसत्, वध्यात्, अध्यगीष्महि च इति , अथ जप्यः, पित्र्यम्, सनम्, गव्यम्, नाव्यम् इति, कोकूयते, कथयति[43] चेत्यादयश्शब्दाः संकलितास्सन्ति। 'आह इत्यस्मिन् ब्रूञ् व्यक्तायां वाचि धातोः ब्रू इत्यस्य स्थाने आहादेशो क्रियते[44]। एवञ्च 'अघसत् अत्र 'लुङ् सनोर्घस्लृ[45] इति सूत्रेण अद् धातोः स्थाने घस्लृ इति विशेषादेशो वर्तते। वध्यात् अत्र हन् धातोः वधादेशो 'हनो वध लिङि[46] इति

सूत्रेण भवति। एवमेव अधिगीष्महि अस्मिन् क्रियापदे इङ् अध्ययने धातोः गाङ् आदेशो भवति। पित्र्यम् अस्मिन् पितुर्यच्च[47] इत्यनेन पितृशब्दाद् आगतार्थे यत् प्रत्ययस्य विधानं दृश्यते। अतः परं गव्यम् अत्र 'गोपयसोर्यत्[48] सूत्रेण यत् प्रत्ययो भवति। कथयति प्रयोगे 'कथ वाक्यप्रबन्धे इति चुरादिगणस्य धातोः णिच् प्रत्ययो विधीयते। अवोचत् अस्मिन् वच् धातोः लङ्लकारे 'वच उम्' इति सूत्रेण उमागमो क्रियते। एवम्प्रकारेण एते विशेषादेशस्य विधि–निषेधादयश्च केचन प्रयुक्ताः पदस्य प्रयोगाः सन्ति। पाणिनीयशिक्षायां यथा उच्यते–

**मन्त्रो हीनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्रशत्रुस्स्वरतोऽपराधात्।।**[49]

श्लोकेऽस्मिन् 'आह' इति क्रियापदं प्रतियत्नरूपस्य प्रकृत्युपस्कारस्य रूपम् अस्ति। एवञ्च ब्रूञ् व्यक्तायां वाचि धातोः लट्लकारे 'आह इति विशेषादेशो क्रियते।

**2. <u>प्रत्ययोपस्कारः</u>–** प्रत्ययस्य भूषणरूपा प्रकृत्युपस्कारस्य अनन्तरं इट्, सुक्, ईकक् आदयः प्रत्ययस्य उपस्काराः प्रोक्ताः आचार्येण। उदाहरणेषु– सहिता, वारिता, भ्रुवै, भ्रूणाम् च, देवासः, पारयामसि, तारिषत्, भवाति इति, पीत्वाय, त्वयका[50] च इत्यादयो वर्तन्ते। 'सहिता इत्यस्मिन् प्रयोगे आर्धधातुकस्येड्वलादेः[51] सूत्रेण प्रकृति–प्रत्यययो इडागमो भवति। एवमेव 'वारिता अत्रापि उपर्युक्तेन सूत्रेणैव इडागमो। भ्रुवै अत्र च भ्रू अङ्गस्य उवङ्[52] आदेशो क्रियते। यूनाम् अत्रापि आमि परतः "स्वपो नद्यापो नुट्[53] इत्यनेन नुडागमो भवति। पारयामसि अस्मिन् 'इदन्तो मसिः[54] इति सूत्रेण छन्दसि विषये मसि इति इकारान्तश्शब्दो निर्मीयते। यथा शिशुपालवधस्य **काव्यप्रयोगे–**

**उपप्लुतं पातुमदोमदोतैस्त्वमेव विश्वम्भरविश्वमीशिषे।**
**ऋतेरवेः क्षालयितुं क्षमेत कः, क्षपातमस्काण्डमलीमसं नभः।।**[55]

अस्मिन् माघकवेः पद्ये 'क्षालयितुम् इति क्रियापदे प्रत्यये इट् आगमे क्रियते प्रत्ययोपस्कारस्य भूषणरूपं अस्ति।

**समवायरूपाः–** अतः परं समवायरूपाः स्यसिच्–सीयुड् इत्यादयः प्रत्ययाः उपस्काररूपाः भवन्ति। यथा च– करिष्यति, अकरिष्यत्, वक्ता, ब्रवीति चेति, अपाक्षीत्, अपीपचत्, अशिषत्, अलिक्षत् इति, अथ च कृषीष्ट, कुर्यात्, कुर्वीत[56] एतानि क्रियापदानि संकलितानि शृङ्गारप्रकाशे। करिष्यति इत्यत्र 'स्यतासी लृलुटोः[57] व्याकरणसूत्रेण 'स्य प्रत्ययो विधीयते। वक्ता अत्र तासि प्रत्ययः अस्ति। ब्रवीति अत्र च ब्रुव ईट्[58] इति सूत्रेण ईडागमः क्रियते। अपाक्षीत् अत्र 'च्लेः सिच्[59] अनेन च्लि स्थाने सिजादेशो भवति। एवमेव अपीपचत्, अलिक्षत् इत्यादिषु सिजादेशो ज्ञेयमिति। कृषीष्ट इत्यस्मिन् क्रियापदे 'लिङः सीयुट्[60] सूत्रेण सीयुडागमो विधीयते। कुर्यात् अत्र च 'यासुट्

परस्मैपदेषूदात्तो ङिच्च[61] इति सूत्रेण यासुडागमः एवमेव कुर्वीत इत्यत्र सीयुडागमो दृश्यते। कालिदासस्य महाकाव्यस्य **काव्यप्रयोगे** यथा–

**मन्दः कवियशः प्रार्थी, गमिष्याम्युपहास्यताम्। प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः।।**[62]

रघुवंशस्य श्लोकेऽस्मिन् प्रत्ययोपस्कारस्य भूषणरूपे 'गमिष्यामि इति क्रियापदे धातोः समवायरूपः सम्बन्धरूपश्च 'स्य' आगमो भवति।

**अध्याहाररूपाः–** अतः परम् अध्याहाररूपाः प्रत्ययार्थविशेषकोपसर्गाः मप्–तरप् आदयः प्रत्ययाः प्रतिपादिताः। प्रयोगेषु यथा– सुमनायते, दुर्मनायते, अभिमनायते, अभिषेणयति चेति। कृत्रिमम्, पचतितराम्, पचमानः, सर्वेषाम्, वृक्षाणाम् इत्येतानि उदाहरणानि संदृश्यन्ते शृङ्गारप्रकाशे[63]। सुमनायते अस्मिन् सु इत्युपसर्गः पूजितार्थे उक्तवान् निरुक्ते यास्काचार्यः। अथ च सु उपसर्गपूर्वकात् यङ् प्रत्ययार्थोऽपि विशेषो वर्तते। एवञ्च दुर्मनायते अत्र दुर् उपसर्गः प्रातिलोम्येऽर्थे अस्ति। अभिमनायते अभिषेणयति चेत्यत्र अभि उपसर्गः आभिमुख्येऽर्थे विद्यते प्रत्ययार्थश्च विशिष्टो भवति उपसर्गकारणात्। व्यवहासी इत्यस्मिन् संज्ञायां भावे[64] णच् प्रत्ययो वर्तते। पचतितराम् अस्मिन् च तरप् प्रत्ययः। पचमानः अत्र शानच् प्रत्ययः अस्ति। एवमेते अध्याहाररूपाः प्रत्ययोपस्काराः शब्दास्सन्ति।

**वैकृतरूपाः–** अपि च अत्र वैकृतरूपाः आदेश–सर्वादेश–प्रत्ययादेशादयो भवन्ति। प्रयोगेषु– गार्ग्यायणः, कौबेरकः, गौधेरः, कौलेयक चेति, पवनः, पावकः, वृक्षस्य, वृक्षैः इति च, वेद, विवेद, विद्वान्[65] इत्यादयश्च सन्ति। गार्ग्यायणः इति शब्दे यञिञोश्च[66] इत्यनेन सूत्रेण **फ**क् प्रत्ययः, **फ**कारस्य स्थाने च 'आयनेयीनीयियः **फ**ढखछघां प्रत्ययादीनाम्[67] इत्यनेन पाणिनीयेन सूत्रेण आयनादेशो क्रियते। गौधेरः इत्यत्र गोधाया ढ्रक्[68] इत्यनेन ढ्रक् प्रत्यये सति ढकारस्य स्थाने एयादेशो भवति। पवनः प्रयोगे पूञ् पवने धातुना ऊकारस्य गुणे कृते पो+अनः इति स्थिते एचोयवायावः[69] आवादेशो विधीयते। पावकः अत्र ण्वुल्तृचौ इत्यनेन ण्वुल् प्रत्ययः, अत्र वु इत्यस्य सर्वस्य स्थाने युवोरनाकौ[70] इत्यनेन अक् आदेशो भवति। अपि च वृक्षस्य इत्यत्र ङस् प्रत्ययस्य स्थाने टाङसिङसामिनात्स्याः[71] अनेन सूत्रेण स्य आदेशो भवति। वृक्षैः अत्र च भिस् प्रत्ययस्य स्थाने 'अतो भिस् ऐस् इत्यनेन सूत्रेण ऐसादेशो भवति।

**यत्नरूपाः–** एवञ्च यत्नरूपाः लुग्लुम्पनविलुम्पनादयः प्रत्ययाः वर्तन्ते। यथा– पचत्, जुहोति, पञ्चालाः, दधि इति। एवं ददृशे, अद्राक्षीत्, कारकः इति। अग्निचित्, शुभंयाः, अश्वति[72] इति च। **काव्यप्रयोगः–**

**आलोके हि निपतति पुरा सा बलिव्याकुला वा, मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती।**
**पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां, कच्चित्कर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति।**[73]

अस्मिन् लिखन्ती, पृच्छन्ती चानयोः यत्नरूपे प्रत्ययोपस्कारे लोपविकारो भवति।

**प्रतियत्नरूपाः–** अथ च प्रतियत्नरूपाः विशेषादेश–विधिनिषेधादयः सन्ति। यथा– तस्थौ, वेद, प्रशाधि, जीवतात् च इति। उदपादि, राष्ट्रियः, आग्नेयः, स्त्रैणम् इति। अपि च सुभ्रूः, सुप्रेयसी, व्यतिहसन्ति, व्यतिगच्छन्ति[74] इति। अत्र तस्थौ, वेद आदिषु क्रियापदेषु विशेषादेशो अभवत्। एवं राष्ट्रे भवः जातः राष्ट्रियः इत्यस्मिन् घ प्रत्ययो विधीयते। एवमेव व्यतिहसन्ति, व्यतिगच्छन्ति इत्येषु निषेधादयः प्रयुक्ताः। एवम्प्रकारेण प्रत्ययेषु उपस्कृताः प्रयोगाः दृश्यन्ते शृङ्गारप्रकाशे।

**3. <u>उभयोपस्काराः</u>–** अत्र उभयोः प्रकृतिप्रत्यययोः भूषणरूपा युष्मत्प्रभृतिप्रयोगादयः। यथा– त्वं पचसि, युवां पचथ, यूयं पचथ, अहं पचामि, आवां पचावः, वयं पचामः, वायुर्वाति, देवो वर्षति, भज्यते शाखा स्वयमेव, अवकिरते हस्ती स्वयमेव, भूषयते कन्या स्वयमेव, ब्रूते कथा स्वयमेति[75]। एतेषु वाक्येषु त्वं, युवां, यूयम्, अहम्, आवां, वयं, वायुः इत्यादिषु शब्देषु युष्मद् अस्मदादिप्रकृतिप्रत्यययोः उपस्काररूपो भावो विधीयते। **काव्यप्रयोगः–**

**मथ्नामि कौरवशतं समरे न कोपाद्, दुःशासनस्य रुधिरं न पिबाम्युरस्तः।**
**सचूर्णयामि गदया न सुयोधनोरुः, सन्धिं करोतु भवतां नृपतिः पणेन।।**[76]

उभयोपस्कारस्य मथ्नामि, पिबामि एवञ्च सञ्चूर्णयामि इत्येतानि क्रियापदानि अहम् इति कर्तारम् अध्याहरन्ति। अहम् इति अस्मत् शब्दस्य रूपमस्ति। अत्र प्रकृति–प्रत्ययोभयोपस्कारस्य भूषणरूपाणि पदानि सन्ति।

**समवायरूपा–** अतः परं समवायरूपा विकरणादयः प्रयोगाः संदृश्यन्ते। यथा– भवति, चोरयति, दीव्यति, सुनोति, तुदति, तनोति, रुणद्धि, क्रीणाति, तप्यते तपः, लूयते केदारः [77] चेत्यादयस्सन्ति। यस्मिन् स्थाने प्रकृति–प्रत्यययोः मध्ये पतितानां विकरणानां योगः प्रतीयते तत्र समवायरूपः उपस्कारः उच्यते। तथा च ते भ्वाद्यादिगणपठितेषु भूवादयः प्रकृति–प्रत्यययोः उपस्काररूपाः कथ्यन्ते। **काव्यस्य प्रयोगे यथा–**

**मदेकपुत्रा जननी जरातुरा, नवप्रसूतिर्वरटा तपस्विनी।**
**गतिस्तयोरेष जनस्तमर्दयन्, अहो विधे त्वां करुणा रुणद्धि नो।।**[78]

अस्य नैषधीयचरितस्य महाकाव्यस्य पद्ये 'रुणद्धि इति क्रियापदं रुधादिगणस्य रुध् धातोः 'रुधादिभ्यः श्नम् इत्यनेन सूत्रेण 'श्नम् इति विकरणस्य योगेन लट्लकारे उत्पद्यते। एतादृशमेव भ्वाद्यादिदशगणेषु विकरणानि प्रयुज्यन्ते।

**अध्याहाररूपा–** अथ च अध्याहाररूपा द्विरुक्त्यादयः उपस्काराः प्रोक्ताः आचार्येण। अर्थाद्यत्र द्वयोः पदयोः उक्तिः कथनं पुनरुच्चारणं वा दृश्यते। उदाहरणेषु– पायं–पायम्, पचति–पचति, ग्रामो–ग्रामो रमणीयः, मूले–मूले स्थूलाः, अग्रे–अग्रे सूक्ष्माः, पूर्वं–पूर्वं पुष्यति, प्रथमं–प्रथमं पच्यते, ज्येष्ठं–ज्येष्ठमुपवेशय, उपर्युपर्यास्ते [79] चेत्यादयः प्रयोगाः

प्रतिपादिताः शृङ्गारप्रकाशे। एवम्प्रकारेण एतेषां शब्दरूपाणां धातुरूपाणाञ्च पौनःपुन्येन प्रयोगो संदृश्यते। एतादृशाः पुनरुक्तशब्दाः प्रायशो प्रतीयन्ते संस्कृतसाहित्ये। महाकवेः कालिदासस्य **काव्यस्य प्रयोगे** यथा –

**मन्दं–मन्दं नुदति पवनश्चानुकूलो यथा त्वां, वामश्चायं नदति मधुरश्चातकस्ते सगन्धः।**

**गर्भाधानक्षणपरिचया–न्नूनमाबद्धमालाः, सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः।।**[80]

मेघदूतस्य अस्मिन् श्लोके मन्दं–मन्दं इत्यनयोः शब्दयोः अध्याहाररूपा द्विरुक्तिः अस्ति या उपस्काररूपेण गृह्यते। अथ च द्विरुक्तेः प्रयोगः कालिदासस्यैव अभिज्ञानशकुन्तलस्य नाटकस्य अन्यस्मिन् मन्दाक्रान्ताछन्दस्य पद्ये–

**न खलु–न खलु बाणः सन्निपात्योऽयमस्मिन्, मृदुनि मृगशरीरे तूलराशाविवाग्निः।।**[81]

अस्मिन् उभयोः शब्दयोः 'न खलु–न खलु इत्यनयोः द्विरुक्तिः दृश्यते। इदम् उदाहरणम् उभयोपस्कारस्य अध्याहाररूपप्रभेदस्य अस्तीति।

**वैकृतरूपाः–** प्रभेदेऽस्मिन् उभयोपस्कारस्य वैकृतरूपाः वांनावादयः आदेशाः उपस्थापिताः भोजराजेन। इमे वां, नौ, वः इत्यादयश्शब्दाः युष्मद्–अस्मद् इत्यनयोः शब्दयोः विशेषविभक्तिवचनेषु रूपाणि वर्तन्ते। यथा च– ग्रामो वाम्, ग्रामो नौ, ग्रामो वः, ग्रामो नः, ग्रामस्ते, ग्रामो मे, ग्रामस्त्वा रक्षत्, ग्रामो मा रक्षत्, मातुलः, क्षत्रियः, श्रोत्रियश्चेत्यादीनि उदाहरणानि सन्ति[82]। यथा अभिज्ञानशकुन्तलस्य नाटकस्य **काव्यप्रयोगे–**

**या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री,**

**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**

**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः,**

**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।**[83]

अस्मिन् पद्ये 'वः' इति वैकृतरूपं पदम् उभयोपस्कारस्य वर्तते। व्याकरणे अस्मान् अस्माकं वा इति शब्दस्य विकृतिः सर्वादेशरूपेण 'वः' इति आदेशः सूत्रैः क्रियते। एवम्प्रकारेण भावार्थे ईशः अस्मान् अवतु रक्षतु इति ज्ञायते।

**यत्नरूपा–** अथ च उभयोपस्कारस्य प्रभेदे यत्नरूपा अनुप्रासादयः प्रतिपादिताः। यथा– अग्निसात् संपद्यते, भस्मसात् भवति, ब्राह्मणसात् स्यात्, देवत्राकरोति, मत्यर्त्रागच्छति, मनुष्यत्रावसति, शुक्लीभवति, पटपटाकरोति, चकासाञ्चकार, कारयामास, बिभराम्बभूव, विदाङ्कुर्वन्तु[84] चेत्यादीनि नैकानि क्रियापदानि समुपलभ्यन्ते साहित्ये। मृच्छकटिकम् इति नाटकस्य **काव्यप्रयोगे** यथा–

**सत्यं न मे विभवनाशकृतास्ति चिन्ता, भाग्यक्रमेण हि धनानि भवन्ति यान्ति।**

**एतत्तु मां दहति नष्टधनाश्रयस्य, यत्सौहृदादपि जनाः शिथिलीभवन्ति।।**[85]

शूद्रककवेः नाटकेऽस्मिन् 'यत्नरूपस्य अनुप्रासादीनाञ्च इत्यनयोः प्रकृति–प्रत्यययोः उपस्कारस्य 'शिथिलीभवन्ति' इति क्रियापदम् अस्ति। शिथिलीभवन्ति' इति पदम् अभूततद्भावे अशिथिलं शिथिलं सम्पद्यते इति शिथिलीभवति इत्यस्मिन्नर्थे 'च्वि प्रत्ययस्य विधानेन निष्पद्यते।

**प्रतियत्नरूपा–** अतः परं उभयोपस्कारे प्रतियत्नरूपा विध्यनुप्रयोगादयः समुद्घाटिताः भोजराजेन। अत्र विध्यर्थे अनुप्रयोगादिषु चार्थे प्रकृति–प्रत्ययार्थो विकारः समुत्पद्यते। यथा प्रयोगेषु– रैपोषं पुष्णाति, समूलकाषं कषति, पुरुषवाहं वहति, ऊर्ध्वशोकं शुष्कः, चूडकनाशं नष्टः, ओदनपाकं पक्वः, सुवर्णनिधायं निहितः, लुनीहि लुनीहि इत्येवायं लुनाति, अधीष्व अधीष्व इत्येवायमधीते, भ्राष्टमट मठमट, खदूरमट इत्येवायम् अटति, ओदनं भुङ्क्ष्व इत्येव अयमभ्यवहरति[86] चेत्यादीनि अनेकानि वाक्यस्योदाहरणानि वर्तन्ते। साररूपे एतेषु प्रयोगेषु प्रायो विध्यर्थः प्रयोज्यव्यापारेण साकमेव अनुप्रयोगादयाः अर्थाः महाभाष्यात् संगृहीतास्सन्ति।

**विशेषः–** अत्र विशेषविवेचने केवलं वी0राघवन् महोदस्य संस्करणस्य काश्चन टिप्पण्य एव उपस्थाप्यन्ते। तेनाच्यते– प्रतियत्नस्यानुशीलने यथा अनुरुध्यते=नास्ति, अरार्यते=आराध्यते ऋ गतौ इत्यतो यङि रूपम्[87] इति अस्ति। अतः परं प्रकृतेर्भूषणरूपे अध्यागच्छति निखञ्जति इति महाभाष्ये[88] प्रदत्तम्। अवकिरते हस्ती स्वयमेव भाष्ये[89] उदाहृतमिदम् इति। भूषयते कन्या स्वयमेव[90] इत्यपि भाष्ये एवोदाहृतम् इत्यवोचद् महोदयः। एवमेव वारिता वृञ् वरणे इत्यस्य ल्युट् प्रत्ययः। वरीता इत्यपि भवति। सर्व एवैते वैदिकाः प्रयोगाः। अशिषत् इति शिष्लृ विश्लेषणे, रुधादिः 19 लुङ्। गौधेरः=गोधायाः पुमान्।[91] नमते दण्डः स्वयमेव इति[92] च। दृश्यते च पायं–पायम् इत्यादीनि उदाहरणानि एतादृशानि अन्यानि च महाभाष्ये[93] काशिकायां च दत्तानि इति। अर्थश्चैषां विवृतः, तेषाम् आम्रेडितपदानां प्रयोगाणां एकपदत्वे पृथक् पदत्वे च पक्षद्वयं विस्तरतो विचारितं पदमञ्जर्याम् इत्युक्तम् अत्यन्तं संक्षेपेण सम्पादकमहोदयेन टिप्पणीषु।[94]

अनेन प्रकारेण भोजराजेन उपस्कारस्य शब्दस्यास्य सामान्यमर्थमेव स्वीकृत्य विवेचनं कृतम्। येन उपस्कारपदेन गृहीताः अर्थस्य तस्य सर्वेऽपि अंशाः अत्र सविस्तरेण गोचरीभूताः।

## सन्दर्भग्रन्थ–सूची–

1 काव्यालङ्कारः, 1.16 आचार्यो भामहः, हिन्दी भाष्यकारः साहित्यवारिधिः रामानन्द शर्मा, चौखम्भा संस्कृत सीरीज आफिस, वाराणसी 2013
2 वक्रोक्तिजीवितम्, आचार्यः राजानकः कुन्तकः, व्याख्याकारः श्री राधेश्याम मिश्रः, चौखम्भा संस्कृत संस्थानम् वाराणसी
3 शृङ्गारप्रकाशः, 11.356 पृ0 675, आचार्यभोजदेवः, सम्पादकौ सनातनकविः महामहोपाध्यायः रेवाप्रसादो द्विवेदी, प्रो0 सदाशिवकुमारो द्विवेदी च इन्दिरागान्धी राष्ट्रियकलाकेन्द्रम् नईदिल्ली, 2007
4 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 03
5 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 03

6 महाभाष्य–वार्तिकम् 6.1.137–9 महर्षिपतञ्जलिः, टीकाकारः सम्पादकश्च प्रो0 हरिनारायणः तिवारी, चौखम्भा विद्याभवनम् वाराणसी 2014
7 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 62
8 वी0राघवन् शृङ्गारप्रकाशः पृ0 / 67 सम्पादकः वी0राघवन् महोदयः, वर्षम् 1962
9 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 62
10 तत्रैव पृ0 / 63
11 उपसर्गाः क्रियायोगे इति सूत्रम् अष्टाध्यायी 1.4.59
12 मुक्तबोधटीकायां दुर्गादासः
13 अष्टाध्यायी 5.4.29, महर्षिपाणिनिः, सम्पादकः खेमराजः श्रीकृष्णदासः, श्रीवेङ्कटेश्वर मुद्रणालयः, संवत् 1954
14 अष्टाध्यायी 5.1.123
15 अष्टाध्यायी 5.4.34
16 अष्टाध्यायी 5.4.38
17 मेदिनीकोशः 145 / 2–3
18 अष्टाध्यायी / 4.1.44
19 अष्टाध्यायी 4.1.71–72
20 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 63
21 अष्टाध्यायी 3.1.2
22 अष्टाध्यायी 3.1.9
23 नैषधीयचरितम् 3 / 67 महाकविः श्रीहर्षः, व्याख्याकारः डॉ0 देवर्षि सनाढ्य शास्त्री, चौखम्भा कृष्णदास अकादमी वाराणसी, 2005
24 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 63
25 इङ्गिकावध्युपसर्गतो न व्यभिचरितः। लघुसिद्धान्तकौमुदी (गीताप्रेस गोरखपुर, प्रकाशनम्) वार्तिकम् पृ0 106
26 अष्टाध्यायी 6.1.9
27 अष्टाध्यायी 1.100
28 धातुपाठः 1084 महर्षिपाणिनिः,
29 काशिका 6.1.1 आचार्यो वामनजयादित्यः, पाणिनी–अष्टाध्यायीसूत्रवृत्तिः, व्याख्याकारः श्रीनारायणमिश्रः, चौखम्भा प्रकाशनम् वाराणसी 2008
30 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 63
31 अष्टाध्यायी 8.3.65
32 अष्टाध्यायी 8.4.1
33 अष्टाध्यायी 6.4.81
34 उणादिसूत्रम् (अष्टाध्यायी) महर्षिपाणिनिः
35 महाभाष्यम् पश्पशाह्निकम्
36 नलचम्पू 1.6 महाकविः त्रिविक्रमभट्टः, व्याख्याकारः डॉ0 परमेश्वरदीन पाण्डेयः, चौखम्भा सुरभारती प्रकाशनम् वाराणसी 2014
37 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 63
38 अष्टाध्यायी 6.3.89
39 अष्टाध्यायी 8.2.77
40 अष्टाध्यायी 7.1.100
41 अष्टाध्यायी 8.2.77
42 वेणीसंहारः 1.10 कविवरः भट्टनारायणः, संस्कृतव्याख्याकारः पं0 रामदेवझा मैथिलः, चौखम्भा अमरभारती प्रकाशनम् वाराणसी सं0 2039
43 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 63
44 ब्रुवः पञ्चानामादित आहो ब्रुवः इति सूत्रेण (अष्टाध्यायी 3.4.84)
45 अष्टाध्यायी 2.4.37
46 अष्टाध्यायी 2.4.42
47 अष्टाध्यायी 4.3.79
48 अष्टाध्यायी 4.3.157
49 पाणिनीयशिक्षा 52, आचार्यः पाणिनिः, व्याख्याकारः शिवराज आचार्यः कौण्डिन्न्यायनः, चौखम्भा विद्याभवनम् वाराणसी 2012
50 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 63
51 अष्टाध्यायी 7.2.35
52 अचिश्नुधातुभ्रुवां य्वोरियङुवङौ इति सूत्रम् अष्टा0 6.4.77
53 काशिका 7.1.54
54 अष्टाध्यायी 7.1.46
55 शिशुपालवधम् 1.38, महाकविः माघः, सम्पादकः साहित्योपाध्याय वेताल श्रीअनन्तरामशास्त्री, चौखम्भा संस्कृत सीरीज ,वाराणसी 1984
56 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 63

57 अष्टाध्यायी 3.1.33
58 अष्टाध्यायी 7.3.93
59 अष्टाध्यायी 3.1.44
60 अष्टाध्यायी 3.4.102
61 अष्टाध्यायी 3.4.102
62 रघुवंशम् 1.3, महाकविः कालिदासः, कालिदास ग्रन्थावली, सम्पादकः अनुवादकश्च ''सनातनकवि'' प्रो0 रेवाप्रसादो द्विवेदी, कालिदास–संस्कृत–अकादमी, उज्जयिनी 2008
63 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 63
64 काशिका 3.3.43
65 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 64
66 अष्टाध्यायी 4.1.104
67 अष्टाध्यायी 7.1.2
68 अष्टाध्यायी 4.1.129
69 अष्टाध्यायी 6.1.75
70 अष्टाध्यायी 7.1.1
71 अष्टाध्यायी 7.1.12
72 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 64
73 उत्तरमेघः 83 प्रक्षिप्तः श्लोकः, कालिदास–ग्रन्थावली, सम्पादकः महामहोपाध्यायः 'सनातनकविः'' प्रो0 रेवाप्रसाद द्विवेदी
74 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 64
75 तत्रैव
76 वेणीसंहारः 1.15, कविः भट्टनारायणः
77 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 64
78 नैषधीयचरितम्, 1.135
79 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 64
80 पूर्वमेघः 10 महाकविः कालिदासः, कालिदास–ग्रन्थावली, सम्पादकः 'सनातनकविः महामहोपाध्यायः'' प्रो0 रेवाप्रसाद द्विवेदी
81 अभिज्ञानशाकुन्तलम् 1.10 महाकविः कालिदासः, व्याख्याकारः डॉ0 गंगासागर रायः, चौखम्भा संस्कृतभवनम् वाराणसी, 2005 ई0
82 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 64
83 अभिज्ञानशकुन्तलम् 1.1 महाकविः कालिदासः,
84 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 64
85 मृच्छकटिकम् 1.13, महाकविः शूद्रकः, व्याख्याकारः प्रो0 जयशंकरलाल–त्रिपाठी, चौखम्भा कृष्णदास अकादमी वाराणसी, 2010
86 शृङ्गारप्रकाशः प्रथमप्रकाशः पृ0 / 64
87 महाभाष्यम् 3.1.22 वा0 2
88 तत्रैव 1.2.42(12)
89 तत्रैव 3.1.87(18)
90 तत्रैव 3.1.89(1)
91 वी0राघवन् शृङ्गारप्रकाशः पृ0 / 67
92 महाभाष्यम् 3.1.87(3)
93 तत्रैव 8.1.1–12(3–9)
94 वी0राघवन् शृङ्गारप्रकाशः पृ0 / 68